International Journal of Sanskrit Research 2022; 8(2): 65-67

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(2): 65-67
© 2022 IJSR
www.anantaajournal.com
Received: 18-01-2021
Accepted: 27-02-2021

**डॉ. मोहिनी आया**
सहायिकाचार्या, संस्कृत विभाग,
दिल्ली विश्वविद्यालय, दिल्ली, भारत

**Corresponding Author:**
**डॉ. मोहिनी आया**
सहायिकाचार्या, संस्कृत विभाग,
दिल्ली विश्वविद्यालय, दिल्ली, भारत

# शाब्दबोधः तत्सहकारिकारणानि च

**डॉ. मोहिनी आर्या**

**प्रस्तावना**

स्वविचारान् व्यक्त्यन्तरं प्रति संप्रेशयितुं लघुतमं किञ्चन तत्त्वम् अपेक्षते तदस्ति 'वाक्यम्'। सामान्यवक्ता अपि स्वभावान् व्यञ्जयितुं वाक्यस्य आश्रयणं करोत्येव। तादृशं वाक्यं श्रोता कथं गृह्णाति का च तस्य प्रक्रिया इत्यस्मिन् विषये शास्त्रेषु चर्चा कृता वर्तते। अर्थग्रहणस्य तां प्रक्रियां ज्ञातुं शाब्दबोधस्य ज्ञानम् आवश्यकं भवति। व्याकरणम्, न्यायः, मीमांसा च शाब्दबोधविवेचकानि प्रमुखशास्त्राणि विद्यन्ते। अत एव शाब्दबोधप्रक्रियायाम् एतेषां शास्त्रत्रयाणां मर्मज्ञाः ''पदवाक्यप्रमाणज्ञः'' इत्युपाधिना विभूषिताः जायन्ते। ''शाब्दबोधः' एका स्वतन्त्रप्रक्रिया वर्तते। अत एतादृशस्य शाब्दबोधस्य तत्सहकारिकारणानाञ्च विषये अत्र सूक्ष्मावलोकनं विहितं वर्तते।

**शाब्दबोधस्य स्वरूपम्**

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।। [1]

भुवनेऽस्मिन् न केवलं परस्परव्यवहारायैव शब्दज्ञानम् आवश्यकमस्त्यपितु स्वान्तरिकभावानां अभिव्यक्त्यर्थमपि इदं ज्ञानं अत्यावश्यकं दरीदृश्यते अत एव भर्तृहरिणा वाक्यपदीये उक्तम्–"अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्" [2] यथा अस्माभिः ज्ञायते एव भर्तृहरिणा मन्यते यत् जगत्प्रक्रियेयं शब्दतत्त्वस्यैव परिणामोऽस्ति अतः तैः उच्यते–

अनादिनिधनं ब्रह्म–शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।। [3]

शब्दस्य महत्त्वं प्रतिपादयन् न्यायसूत्रकारः गौतमः भणति यत् "आप्तोपदेशः शब्दः"[4] इति। शब्दस्य परिभाषा महाभाष्यकारेण एवं प्रतिपादिता यत्–येनोच्चारितेन सास्ना–लाङ्गूल–ककुद–खुर–विषाणिनां सम्प्रत्ययो भवति स शब्दः अथवा "प्रतीतपदार्थको लोके ध्वनिःशब्दः" इत्युच्यते अत आह सः "ब्राह्मणेनावश्यं शब्दाः ज्ञेयाः" [5] यतोहि तेषामेवायमप्यभिप्रायः वर्तते यत्–शब्देनैवार्थोऽभिधेयो नापशब्देनेति एवं क्रियमाणमभ्युदयकारि भवतीति [6]–

शब्दस्य महत्त्वं दण्डिनाऽपि प्रतिपादितमस्ति तद्यथा–

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।। [7]

सम्प्रति अस्माभिः ज्ञायते यत् नास्ति शब्दव्यतिरिक्तास्मिन् जगति किमपि। अतः शब्दार्थज्ञानानन्तरं सम्प्रत्यस्माकं मनसि स्वाभाविकतया जिज्ञासेयं समुदेति यत् कोऽसौ शाब्दबोधः किं च तस्य स्वरूपं चेत् उच्यते "शब्दस्यायं शाब्दबोधः"– शब्दजन्य इत्यर्थः। शब्दश्चासौ बोधश्च शाब्दबोधः। अत्र शब्दपदेन वाक्यं गृह्यते। "वाक्यं नाम परस्परसाकाङ्क्षः क्रियान्वितः पदसमूहः।। [9] आकाङ्क्षा नाम एकपदार्थज्ञाने जाते अस्य अन्वयार्थः कः? इत्येवं रूपा जिज्ञासा। यथा–देवदत्तो गाम् आनयति इत्येकं वाक्यम् अत्र देवदत्त इत्युक्तौ– सः किं करोति इति तदन्वयार्थस्य जिज्ञासा जायते। सा च आनयति इति क्रियापदेन निवर्तते। पुनश्च काम् आनयति? इत्याकाङ्क्षा गाम् इत्यनेन पूर्यते।

एवं गामित्युक्तौ च अन्यार्थस्याकाङ्क्षा जायते। यत्र "द्वारम्" इत्येकं पदं प्रयुज्यते तत्रापि "पिधेहि त्वम्" इति अध्याहारः। अत एव पदसमूह एव वाक्यमित्युक्तम्। यत्र "पिधेहि" इत्येकं पदं तत्र "द्वारम्" इति अध्याहारः। अत एव पदसमूहो वाक्यमित्युक्तम् एवञ्च शाब्दबोधो नाम वाक्यार्थज्ञानमित्युच्यते। परस्परं विशेष्यविशेषणभावमापन्नाः पदार्थाः शाब्दबोधे गोचरीभवन्ति। तत्र एकः पदार्थः विशेषणरूपः अपरश्च विशेष्यरूपः तदेव विशेष्यं स्वेतरपदार्थं प्रति विशेषणम् अपि भवति।

शाब्दबोधप्रक्रियां निरूपयन् आचार्यविश्वनाथपञ्चानन अब्रवीत् यत् शाब्दबोधे पदज्ञानं करणं तथा पदार्थज्ञानं व्यापारो भवति अथ च फलं तु शाब्दबोध एव अस्ति एवं शक्तिधीः अर्थात् पदपदार्थसम्बन्धस्य ज्ञानम् सहकारिकारणं वर्तते।

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।। [8]

**शाब्दबोधस्वरूपविवेचने नैयायिकमतम्:** प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधः इति नैयायिकाः। "लः कर्मणि च भावे चाकर्मकेभ्यः"[10] अस्मिन् सूत्रे अनुवृत्तस्य कर्तरि इत्यस्य कर्तृत्वमित्यर्थः। कर्तृत्वं नाम कृतिः। कृतिः नाम यत्नः, न तु व्यापारः। धातुः तु फलं व्यापारश्च अर्थः। चैत्रः तिङ्गर्थस्य कृते आश्रयतासम्बन्धेन प्रथमान्तार्थे अन्वयः। "चैत्रः तण्डुलं पचति" इत्यत्र "तण्डुलनिष्ठविक्लित्त्यनुकूलव्यापारसहितकृत्याश्रयः चैत्रः" इति शाब्दबोधम् आहुः। कर्मणि प्रयोगे तु तिङ्गर्थः कर्मत्वम्। कर्मत्वञ्च फलाश्रयत्वम्। फलस्य धातुलभ्यत्वेन आश्रयत्वेन तिङर्थः इति पर्यवस्यति।

1. "चैत्रेण पच्यते ओदनः" इत्यत्र "चैत्रनिष्ठकृतिजन्यव्यापारजन्यविक्लित्त्यात्रयः ओदनः" इति बोधः।
2. चैत्रेण सुप्यते इति भावे प्रयोगे तु "प्रथमान्तपदाभावात् अगत्या चैत्रकर्तृकः स्वापः इतिबोधम् अङ्गीकुर्वन्तः वैयाकरणमतं प्रविशन्ति।

- **शाब्दबोधस्वरूपविवेचने वैयाकरणमतम्:** ्वैयाकरणास्तु – धात्वर्थमुख्यविशेष्यकं शाब्दबोधम् उररीकुर्वन्ति।

1. "चैत्रो ग्रामं गच्छति" इत्यत्र उत्तरदेशसंयोगानुकूलव्यापारो गमेरर्थः। "ग्रामनिष्ठसंयोगानुकूलः चैत्राभिन्नकर्तृनिष्ठवर्तमानकालिकः व्यापारः" इति बोधः।
2. "घटं जानाति" इत्यत्र ज्ञानानुकूलात्ममनःसंयोगरूपव्यापारो धात्वर्थः। ज्ञानं विषयतासम्बन्धेन घटे वर्तते। घटविषयक ज्ञानानुकूलात्ममनःसंयोगरूपव्यापारः इत्यर्थः।
3. "चैत्रेण पच्यते तण्डुलः" इत्यत्र चैत्रकर्तृकव्यापारजन्यतण्डुलनिष्ठविक्लित्ति इति बोधः। प्राचीनवैयाकरणमते तु कर्मणि प्रयोगे अपि व्यापारविशेष्यको बोधिति विशेषः। तेषां मते कर्माभिन्नतण्डुलविक्लित्त्यनुकूलः चैत्रकर्तृको व्यापारिति बोधः।
4. "विप्राय गां ददाति"– स्वस्वत्वध्वंसपूर्वक परस्वत्वानुकूलव्यापारो दाधात्वर्थः तथा उद्देश्यत्वं चतुर्थ्यर्थः। गोरूपकर्मणः आश्रयतासम्बन्धेन परस्वत्वशब्दे विद्यमाने स्वत्वरूपफले अन्वयः। गोवृत्तिस्वस्वत्वध्वंसपूर्वक विप्रस्वत्वानुकूलः विप्रोद्देश्यको व्यापारः इति बोधः।
5. वृक्षात् पर्णं पतति इत्यत्र अवधित्वं पञ्चम्यर्थः। अधोदेशसंयोगानुकूलः संयोगसमानाधिकरणव्यापारो पतधात्वर्थः। अत्र पतधातुः अकर्मकः "वृक्षावधिकः पर्णनिष्ठाधोदेशसंयोगानुकूलव्यापार" इति बोधः। यदा तु संयोगव्यधिकरणव्यापारोऽर्थः तदा पतधातुः सकर्मकः। "नरकं पतति" इति प्रयोगदर्शनात्। नरकनिष्ठसंयोगानुकूलव्यापार इति बोधः।
6. 6) षष्ठ्यर्थाः सम्बन्धाः बहवः यथा–

1) "शास्त्रस्य ज्ञानम्" इत्यत्र विषयत्वं षष्ठ्यर्थः। शास्त्रविषयकं ज्ञानमिति बोधः।
2) "शत्रोः नाशः" इत्यत्र प्रतियोगित्वं षष्ठयर्थः। शत्रुप्रतियोगिकः नाशः इति बोधः।
3) "राज्ञः पुरुषः" इत्यत्र स्वामितानिरूपितस्वत्ववान् इति बोधः।
4) "गुरोः वाक्यम्" इत्यत्र गुरूच्चरितं वाक्यम् इति बोधः।

7. "भूतले घटः" इत्यत्र आधेयत्वं सप्तम्यर्थः। भूतलनिष्ठः घट इति बोधः।
8. "चैत्रः हसति" इत्यत्र मुखविकासानुकूलव्यापारविशेषः हस् धात्वर्थः। मुखविकासः फलम्। चैत्रनिष्ठः मुखविकासानुकूलव्यापारः इति बोधः।

**"शाब्दबोधस्य सहकारिकारणनि"**

**सहकारिकारणनिरूपणम्:** शाब्दबोधाय सहकारिकारणानां अत्यन्तापेक्षा भवति यतोहि यावत् पर्यन्तम् अस्मभ्यम् एतेषां ज्ञानं नास्ति तावत् शाब्दबोधः कथञ्चिदपि भवितुं नार्हति। सहकारिकारणान्यिमानि आसत्तियोग्याताकाङ्क्षादयः सन्ति। सम्प्रति विविधशास्त्रानुसारेण आसत्यादिनां निरुपणं क्रियते।

**आसत्तिनिरुपणम्**

1. **आलंकारिकाणांमते आसत्तिः** किं नाम आसत्ति इति निरूपयन् आचार्यो विश्वनाथः भणति यत् "आसत्तिर्बुद्ध्यविच्छेदः"– बुद्धिविच्छेदेऽपि वाक्यत्वे इदानीमुच्चरितस्य देवदत्तशब्दस्य दिनान्तरोच्चरितेन गच्छतीति पदेन सङ्गतिः स्यात्। [10]

यथा–"गिरिर्भुक्तमग्निमान् देवदत्तेन" अत्र "गिरिरग्निमान्" तथा "देवदत्तेन भुक्तम्" इमे द्वे वाक्ये स्तः। "गिरिः" इत्यस्य सम्बन्ध "अग्निमान्" इत्यनेन पदेन सह वर्तते परञ्च "भुक्तम्" इत्येतस्य पदस्य व्यवधानेन "गिरिर्भुक्तमग्निमान् देवदत्तेन" अस्मिन् पदे आसत्त्यभावो वर्तते। तथैव देवदत्तात् प्राक् "अग्निमान्" पदस्यास्य व्यवधानं दरीदृश्यते अतः अत्र आसत्त्याभावात् वाक्याभावो वर्तते यतोहि "वाक्यं स्याद्योग्यताकांक्षासत्तियुक्तः पदोच्चयः" [12] इति।

2. **आसत्तिविषये वैयाकरणानां मतम्:** वैयाकरणै आसत्ति एवं निरूपिता वर्तते यथा तैः उच्यते – "प्रकृतान्वयबोधाननुकूलपदाव्यवधानम् आसत्तिः।" [13]

वैयाकरणानां मते इतीयम् आसत्तिः तृतीयसहकारिकारणमस्ति। एतेषां मते "गिरिः अग्निमान्" पदेऽस्मिन् आसत्तिः वर्तते अतः पदमिदं वाक्यमपि वर्तते अतस्माद् पदाद् शाब्दबोधः भवत्येव परञ्च गिरिर्भुक्तमग्मिान् देवदत्तेन इत्यत्र आसत्त्याभावाद् शाब्दबोधः न भवितुमर्हति। "स्थाल्याम् ओदनं पचति" अत्र अधिकरणक्रिया तथा वाचकपदयोः मध्ये यद्यपि ओदनपदस्य व्यवधानमस्ति परञ्च तद् व्यवधानं तु प्रकृतान्वयबोधस्य अनुकूलस्यैव पदस्यास्तीति आसत्तेः नाभावः।

3. **नैयायिकानां मते आसत्तिः** शाब्दबोधसहकारिकारणानां निरूपणे नैयायिकैः "आसत्ति" स्वरूपं एवं प्रतिपादितं वर्तते यथा तैः उच्यते–

आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते।
कारणं सन्निधानं तु पदस्यासत्तिरुच्चयते।। [14]

आसत्तिज्ञानं योग्यताज्ञानमाकाङ्क्षाज्ञानं तात्पर्यज्ञानञ्च शाब्दबोधे कारणम्। एतैः "आसत्तिर्नाम सन्निधानम्" अर्थात् "अन्वयप्रतियोग्यनुयोगिपदयोरव्यवधानमासत्तिः" [14] अर्थात् यत्पदस्य येन पदेन सह अन्वयपेक्षितो वर्तते यदि तदपेक्षितयोः द्वयोरपि पदयोरव्यवधानेन उपस्थितिः भवति चेत् तत्रासत्तिरस्ति यथा–

"देवदत्तेन भुक्तम्"। तदन्यत्र अस्य विपरीतावस्थायामासत्तिः कथञ्चिदपि न भवितुमर्हति यथा – "गिरिर्भुक्तमग्निमान् देवदत्तेन" इत्यादौ।

## योग्यतानिरूपणम्

किं नाम योग्यता विषयेऽस्मिन् विविधाचार्यैः स्वमतानि स्थापितानि सन्ति। यद्यपि तेषां लक्षणेषु नाधिकभिन्नता दरीदृश्यते तथापि तेषां लक्षणेषु काचित् वैविध्यता तु दृश्यते एव। अत्र केषाञ्चिद् शास्त्राचार्याणां मतानि प्रस्तूयन्ते।

1. **आलंकारिकाणां मते योग्यता:** योग्यतायाः लक्षणमाचार्यविश्वनाथेन एवमकारि तद्यथा–योग्यता पदार्थानां परस्परसम्बन्धे बाधाभावः [15] अर्थात् यदि एकपदार्थस्यापरपदार्थेन सह सम्बन्धे बाधाभावः दृश्यते चेत् तत्र योग्यता वर्तते परन्तु यदि पदोच्चयस्यैतदभावेऽपि वाक्यत्वे "वह्निना सिञ्चति" इत्याद्यपि वाक्यं स्यात्। अतः कथनस्यायमभिप्रायः यत् योग्यतायाः अभावे यदि पदसमुदायो वाक्यत्वेन स्वीक्रियते चेत् तदानीं तु "वह्निना सिञ्चति" इत्यत्रापि वाक्यत्वम् अस्त्यैव।
2. **नैयायिकानां मते योग्यता:** एतेषां मते योग्यतायाः स्वरूपम् एवं वर्तते – "पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता" [16] अर्थात् एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता इत्यर्थः। योग्यतायाः अभावे "वह्निना सिञ्चति" इत्यादौ न शाब्दबोध इति एतेषां मतं वर्तते यद्यपि योग्यतायाः विषये प्राचीननव्यनैयायिकयोः मध्ये मतभेदो वर्तते परन्त्वत्र शोधपत्रविस्तरभयात् न कृत्स्नं दीयते।
3. **वैयाकरणानां मते योग्यता:** एतेषां मते "योग्यता च परस्परान्वयप्रयोजकधर्मवत्त्वम्।" [17] अतः "वह्निना सिञ्चति" इतीदं वाक्यं योग्यं यतोहि सेकान्वयप्रयोजकद्रवद्रव्यत्वं योग्यता जले वर्तते तथा करणत्वेन जलस्य अन्वयप्रयोजकाद्रीकरणत्वरूपी योग्यता सेचनक्रियायामस्ति अत उभयोः परस्परसम्बन्धे सति शाब्दबोधः जायते। परस्परसम्बन्धाभावे "वह्निना सिञ्चिति" इत्यत्र योग्यता नास्ति।

## आकांक्षानिरूपणम्

- **आलंकारिकाणां मते आकाङ्क्षा:** आलंकारिकैः एवं उक्तम् "आकांक्षा प्रतीतिपर्यवसानविरहः" [18] यथा– "देवदत्तो ग्रामम्" इत्युक्ते गच्छतीति क्रियायाकांक्षा भवति यतोहि तया विना वाक्यार्थज्ञानस्य पर्यवसानं भवितुं नार्हति। इयं आकांक्षा भावरूपास्ति नाभावरूपा यतोहि अभावस्याभावपि प्रतियोगिस्वरूपैव भवति अतः प्रतीतेः (जिज्ञासायाः) पर्यवासनस्य (अभावस्य) विरहः (अभावः) अपि प्रतीतिरूप अस्ति। यदि निराकांक्षस्यापि वाक्यत्वं स्वीक्रियते चेत् तदानीं तु "गौरश्वः पुरुषो हस्ती" इत्यादिनां वाक्यानामपि वाक्यत्वं स्यात्।
- **वैयाकरणानां मतम्:** वैयाकरणै आकांक्षायाः स्वरूपमेवम् उच्यते वाक्यसमयग्राहिकाऽऽकाङ्क्षा [19] कथनस्यायमभिप्रायो वर्तते यत् यया वाक्यसमयस्य अर्थात् वाक्यसंकेतस्य ज्ञानं भवति सैवाकाङ्क्षा उच्यते। अत्र सामान्यरूपेण वैयाकरणानां मतोपस्थापनं कृतमस्ति विषयेऽस्मिन् एतेषां इतोऽपि कथनमस्ति परञ्च अत्र संक्षेपेणैव उच्यते।
- **नैयायिकानां मतम्:** आकाङ्क्षा एतै एवं निरूपितास्ति यथा–"यत्पदेन विना यस्याननुभावकता भवेत् साकाङ्क्षा" [20] येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकाङ्क्षा वर्तते इत्यर्थः। अस्यायमाभिप्रायो वर्तते क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति परन्तु क्रियाकारकयोः सन्निधानं तु आसत्त्या चरितार्थं भवति परञ्च घटकर्मताबोधं प्रति घटपदस्य उत्तरद्वितीयरूपाकाङ्क्षायाः ज्ञानं कारणं भवति। अनेनैव कारणेन घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः यतोहि तस्मिन् आकाङ्क्षा नास्ति। "अयम् एति पुत्रो राज्ञः पुरुषोऽपसार्यताम्" इत्यादौ तु पुत्रेण सह राजपदस्य तात्पर्यग्रहे सति तेन सहैव अन्वयबोधः भवति। पुरुषेण सह तात्पर्यग्रहे तु तेन सहान्वयबोधः स्यादेव।

## तात्पर्यनिरूपणम्

1. **नैयायिकमतम्:** वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्। [21] तात्पर्यं नाम वक्तुरिच्छा इति। यदि तात्पर्यज्ञानं कारणं न स्याद् तदा "सैन्धवमानय" इत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोध इति न स्यात्। यतोहि सैन्धव पदेन अश्वलवणयो उभयोरपि बोधः भवति यात्रावसरे सैन्धवपदात् अश्वस्य बोधः भवति किञ्च भोजनावसरे सैन्धवपदात् लवणस्य बोधः भवति अतः शाब्दबोधे तात्पर्यज्ञानमपेक्षितमेवास्ति।
2. **वैयाकरणमतम्:** "एतद्वाक्यं पदं वा एतदर्थबोधायोच्चारणीयमितीश्वरेच्छा तात्पर्यम [22] वक्तुः तात्पर्यं शाब्दबोधं प्रति कारणमस्ति अतेव तात्पर्ये सति "सर्वे सर्वार्थवाचकाः" [23] इति वैयाकरणानां सिद्धान्ते घटशब्दात् पटस्य ज्ञानं न भवति। नानार्थस्थले लोके तात्पर्यन्तु एतद् पदं वाक्यं वा अस्यार्थस्य ज्ञानाय मयोच्चार्यते इति प्रयोक्तुरिच्छारूपम्। लोके प्रकरणादिकमेव तात्पर्यनियामकम् अत एव सैन्धवपदाद् भोजनावसरे लवणस्य बोधः तथा युद्धावसरेऽश्वस्य बोधः भवति। एवं प्रकारेण यथामति सामान्यरूपेण स्वविषयः प्रतिपादितो वर्तते।

## उपसंहार

लक्ष्यावच्छेदनाय यथा शरचक्षोः सहकारित्वं विद्यते तद्वत् शाब्दज्ञानेऽपि तत्सहकारिकारणान्यपि अपेक्षाम् आवहन्ति वस्तुतः सर्वेषु शास्त्रागमेषु शाब्दबोधविषये विस्तृतचर्चा कृता वर्तते परन्त्वत्र प्राधान्येन वैयाकरणनैय्यायिकालंकारिकाणामेव मतमुपस्थापितमस्ति। आप्रथमं वैयाकरणाः ''शब्द'' इति पदं लक्ष्यीकृत्य तद्विषये स्वातन्त्र्येण वदन्ति– ''अनादिनिधनं ब्रह्म.....'' इत्यादि कथनेनैव ज्ञायते यत् तेषां कृते शाब्दज्ञानं कियत् आवश्यकम् अतः ते शाब्दबोधे प्रकृतिप्रत्यययोः सम्प्रत्ययमधिकृत्य शाब्दबोधं कुर्वन्ति परन्तु केवलमयं मिथको व्यापारः यतोहि तेषां वाक्यार्थज्ञानं साध्येन नापितु सिद्धेन भवति। तेषामेव वचनं वक्ष्यमाणा आलंकारिका अपि ''वाक्यं स्याद्योग्यताकांक्षासत्तियुक्तः पदोच्चयः'' इति अन्वयीबुद्धिं धारयन् साधुशब्दानां परस्परमन्वयमेव शाब्दबोधे कारणम् इति अङ्गीकुर्वन्ति। शाब्दबोधे नैय्यायिकाः स्वकीयमार्गं किञ्चित् परिवृत्य ''कृति'' नामकान्यपदार्थम् अनुसृत्य शाब्दबोधं कुर्वन्ति। अत्रान्ते निष्कर्ष अयमेव यत् सर्वेषां लक्ष्यं पदार्थज्ञानमेवास्ति। इति।

## सन्दर्भ


1. वाक्यपदीयम्, ब्रह्मकाण्डम्– कारिका–114, पृ.सं. 147
2. वाक्यपदीयम् ब्रह्मकाण्डम्– कारिका–13, पृ.सं. 7
3. वाक्यपदीयम्, ब्रह्मकाण्डम्– कारिका–1, पृ.सं. 1
4. न्यायसूत्रम्, 1.1.7
5. महाभाष्यम्, पस्पशाह्निकम्, पृ.सं.–7
6. महाभाष्यम्, पस्पशाह्निकम्, पृ.सं.–67
7. काव्यादर्शः 1.4
8. न्यायसिद्धान्तमुक्तावली, शब्दखण्डम्, पृ.सं.–74
9. तर्कभाषा, पृ.सं.–203
10. अष्टाध्यायी, सू.सं.–3.4.69
11. साहित्यदर्पणस्य द्वितीयपरिच्छेदम्, पृ.सं. 24
12. साहित्यदर्पणस्य द्वितीयपरिच्छेदम्, पृ.सं. 24
13. परमलघुमंजूषा, पृ.सं. 92
14. न्यायसिद्धान्तमुक्तावली, शब्दखण्डम्, पृ.सं. 130
15. साहित्यदर्पणस्य द्वितीयपरिच्छेदम्, पृ.सं. 24
16. न्यायसिद्धान्तमुक्तावली, शब्दखण्डम्, पृ.सं. 138
17. परमलघुमंजूषा, पृ.सं. 88
18. साहित्यदर्पणस्य, द्वितीयपरिच्छेदम्, पृ.सं. 24
19. परमलघुमंजूषा, पृ.सं. 83
20. न्यायसिद्धान्तमुक्तावली, शब्दखण्डम्, पृ.सं. 140
21. न्यायसिद्धान्तमुक्तावली, शब्दखण्डम्, पृ.सं. 142
22. परमलघुमंजूषा, पृ.सं. 94